This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय
हस्तलिखित संग्रह
दाखल क्र. M2016 विषय वैदिक कर्मकांड
नांव दर्शपूर्णमास यज्ञ (MSS)
लेखक / लिपीकार (अन्तिम व प्रथमपृष्ठ गहाळ
पृष्ठ 17 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नेविमा॰ अस्त्रीयज्ञो नृवत्सरवासस्मिद्ग्रमृध्यः॥ इजावा॰ एवो असुरप्रजावा
न्दिर्घोरायिः पृथुबुध्नः सभावान्॥ प्राऊ॰ इत्यगोमतीजपति॥ यज्ञोबभूवसआबभू
वसप्रजज्ञेसावावृधे॥ सदेवानामधिपतिर्बभूवसोअस्मा॰ अधिपतीन्करोतुव
य॰ स्यामपतयोरयीणां॥ यज्ञस्यपुनरालेभंजपति॥ यज्ञवांचेतेयज्ञनमोनमश्च
तेयज्ञवित्तेनमेसंतिष्ठस्वस्योतेनमेसंतिष्ठस्वसुभूतेनमेसंतिष्ठस्वब्रह्मवर्च
सेनमेसंतिष्ठस्वयज्ञस्यर्धिमनुसंतिष्ठस्वोपतेयज्ञनमउपतेनमउपतेनमः॥
जपति॥ दृष्टिरसिदृश्यमेपाप्मानमृतात्सत्यमुपागामसुश्रद्धा॥ अपउपस्पृश्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यपेत्तं प्रतिनिष्क्रामति॥ ब्रा ह्मणा ऽस्तर्पयित्नवै॥ संप्रेष्यति॥ अग्नेनयसुपथारा
येअस्मान्विश्वानिदेववयुनानिविद्वान्॥ युयो ध्यस्मज्जुहुराणमेनो भूयिष्ठा
तेनमउक्तिंविधेम॥ प्रवःशुक्राय भानवे भरध्वं हव्यं मतिंचाग्नयेसुपूतं॥ यो
दैव्यानिमानुषाजनू ंष्यंतर्विश्वानिविद्मनाजिगाति॥ अछागिरोमत्तयोदेवयंती
रग्निंयंतिद्रविणंभिक्षमाणाः॥ सुसंदृशा ंसुप्रतीकं ंस्वञ्चं ंहव्यवाडमरतिं
मानुषाणां॥ अग्नेतमस्मद्युयोध्यमीवाअनग्नित्राअभ्यमंतकृधिः॥ पुनरस्म
भ्यं ंसुविताय देवक्षांविश्वेभिरजरेभिर्यजत्र॥ अग्नेत्वंपारयानव्योअस्मान्त्स्व

त्रुत्वयाध्यक्षेणपृत्तनाजयेम॥ आहवनीयमन्वाधत्ते॥ यजमानोध्वर्यु
ंश्चाभिगृहत्यग्निसुरथंयोमयोभूर्युत्तमारोहतिसूर्यमन्हे॥ आदित्यंज्यो
तिषांज्योतिरुत्तमं ंश्वायुत्रापरमंतादृक्षतास्यः॥ वसून्रुद्रा॥ नादित्यानिंद्रे
णसहदेवताः॥ नाःपूर्वेःपरिगृहत्यग्निस्वआयतनेमनीषया॥ रुमामूर्जंपंच
हवींषिप्रविष्टास्तान्देवान्परिगृहत्यग्निपूर्वः॥ अग्निर्हव्यवाडुत्तानावरुतु
पौर्णमास ंहविरिदमेषांमयि॥ पौर्णमास्यां॥ अमावास्य ंहविरिदमेषांमयि॥
अमावास्यायामाहवनीयेनाधीयमानेजपतः॥ अंतराग्नीपत्नीवोदेवस ं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्मागमन्॥ तान्पूर्वः परिगृण्हामिस्वआयतनेमनीषया॥ अंतराग्नीलिष्टं
जपत्तः॥ अध्वर्युः॥ मामदेवाविश्वेसंतुसर्वइंद्रावंतोमरुत्तोविष्णुरग्निः॥ ममां
तरिक्षमुरुगोपमस्तुमह्यंवातः पवतांकामेअस्मिन्॥ गार्हपत्यमन्वाधातिय
यजमानः॥ इहप्रजाविश्वरूपारमंतामग्निंगृहपतिमभिसंवसानाः॥ ताः
पूर्वः परिगृण्हामिस्वआयतनेमनीषया॥ इहपशवोविश्वरूपारमंतामग्निं
गृहपतिमभिसंवसानाः॥ तान्पूर्वः परिगृण्हामिस्वआयतनेमनीषया॥
गार्हपत्येन्वाधीयमानेजपत्तः॥ अध्वर्युः॥ मायेदेवाइविणमायऊंताम

यः शीरस्तुमयिदेवहूतिः॥ दैव्याहोतारावनिषंतपूर्वेरिष्टास्यामतनुवासु
वीराः॥ दक्षिणाग्नेयजुः॥ अयंपितृणामग्निरवाड्व्यापित्र्यआ॥ तपूर्वः प
रिगृण्हाम्यविघनःपितुंकरत्॥ दक्षिणाग्नावन्वाधीयमानेजपत्तः॥ इदमहं प्रश्न
मुग्निज्येष्ठेभ्योवसुभ्योयज्ञंप्रब्रवीमीदमहमिंद्रज्येष्ठेभ्योरुद्रेभ्योयज्ञंब्रे
वीमीदमहंवरुणज्येष्ठेभ्य आदित्येभ्योयज्ञंप्रब्रवीमि॥ अन्वाहितेजुजप
ति॥ विद्युदसिविद्यमेपापमानमृत्तंसत्यमुपैमिमायिश्रद्धा॥ अपउपस्पृश्य॥
अपरेणाहवनीयंदक्षिणामतिक्रम्य॥ पयस्वतीरोषधयःपयस्वद्वीरुधांपयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपांपयसोयत्पयस्तेनमामिद्रसꣳसृज॥अपआचामति॥स्मार्ताहुतापुन
राचामति॥देवाद्देवेषुपराक्रमध्वंप्रथमाद्वितीयेषुद्वितीयास्तृतीयेषुत्रिरेका
दशाऽऽहुमावत्त॥इदꣳश्रकेयंयादृदंकरोम्यात्माकरात्वात्मनइदंकरिष्येभेष
जमिदंमेविश्वभेषजाश्विनाप्रावतंयुवं॥देवतामुपतिष्ठते॥समुद्रंमनसा
ध्यायन्॥संम्राजंसिव्रतपाअसिव्रतानांव्रतपतिरसिव्रतमारभेतत्तेप्रब्र
वीमितद्धवेकयंतेनवाकेयंतेनराध्यासं॥आदित्यमुपतिष्ठते॥अग्नेव्रतपते
व्रतंचरिष्यामितद्धवेकयंतन्मेराध्यतां॥ब्राह्मणोग्निमुपतिष्ठते॥अग्निं॥

वायोव्रतपतेवायुं॥आदित्यव्रतपतेआदित्यं॥व्रतानांव्रतपतेव्रतप
तिं॥उभावग्नीउपस्तृणतेदेवानामुपवसंतुमे॥अहंग्राम्यानुपवसामिमत्सं
गोपतयेपशून्॥सायंपरिस्तीयमाणंजपति॥उत्करेभूपतेभुवनपतेम
हतोभूतस्यपतेब्रह्मणंत्वावृणीमहे॥भूश्चक्रंश्चवाक्चक्रंगोश्चवद्धुवंचध्रु
वꣳश्चनृंश्चपूंश्चैकाक्षराःपूर्दशामाविराजोयाईदंविश्वंभुवनंव्यानशुस्तानो
देवीस्तरसासंविदानाःस्वस्तियंतंनयतप्रजानतीः॥प्रणीताःप्रणीयमाना
अनुमंत्रयते॥अग्निꣳहोतारमिरतꣳहुवेदेवानयक्षियोग्निरयानरुषामहे॥
ब्रह्मपूतास्थकोवोयुनक्तिसवोयुनक्तुविश्वेभ्यःकामेभ्योदेवयज्यायै॥
कस्त्वायुनक्तिसत्वायुनक्तु॥सर्वेप्रविशते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयंतुदेवाःसुमनस्यमानाविर्यंतुदेवाहविषोमेअस्य॥एकृतायेदं॥हितायेदं॥
त्रित्तायेदं॥इदंनस्मेहर्म्यकरोमियोवेदेवाश्चरातिब्रह्मचर्यं॥मेधांवीदिक्षुमनसा
तपस्यंतर्दूतश्चरतिमानुषीषु॥वेदिंदेवामभिमृशंति॥चतुःशिरंवंजायुवतिः
सुपेशाघृतप्रतीकाभुवनस्यमध्ये॥मर्मृज्यमानामनुसंयंतिभोगायुमर्त्यंधुक्षे
यजमानायुकामान्॥वेदेनवेदिंविविदुःपृथिवी॥ग्मंबिभर्तिभुवनेघनस्य
बृहतीमविंदूत्सापृथिव्याध्रयंतापार्थिवानि॥तस्यांबर्हिःप्रथताःसाध्यंतरहि
ष्यंत्राणःपृथिवीदेव्यस्तृ॥वेदेनवेदिंविविदुःपृथिवी॥ग्मंबिभर्तिभुवनेघन

सापप्रथेपृथिवीपार्थिवानि॥

स्ततोयज्ञोजायतेविश्वदानिःवेदिं॥संमृज्यमानामनुमंत्रयंते॥योमाहृदाम
नसायश्चवाचायोब्रह्मणाकर्मणाहोषिदेवाः॥यःश्रुतेनहृदयेनेक्षतात्तस्यै
ब्रूवंत्रेणानाःशिछनद्मि॥संबयजुरियमाणमनुमंत्रयंते॥बृहस्पतेपरिगृहा
णवेदिं॥स्वगावोदेवाःसदनानिसंतु॥तस्यांबर्हिःप्रथताःसाध्यंतरहिं॥त्राणः
पृथिवीदेव्यस्तृ॥जपंति॥यद्वृंतोजिहिं॥सिमपृथिवीमोषधीरपः॥अछैर्यव
स्यकृतस्मेनान्तरिक्षंमोरुपावत्तस्मात्॥यद्वृंतोजिहिं॥सिमजीवमस्यावदि
चकृमानमनसादेवयंतः॥मातेनदेऽउपगामभूम्याःशिवानोविश्वेभुवनेभर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तू॥ स्फ्येनोत्तमांत्वच मुह्यमानां॥ बृहस्पतेस्त्वाण्ड्यृषिर्वीदेव्यु स्तू॥ भूमि
भूखामहिमानंपुपोषलक्षौदेवीदर्धयत्तेपयाऽसि॥ यज्ञियायत्नंविचयंतिरांचो
घधीरापरुत्साङ्करीश्च॥ कृतानुमंत्रयत्ते॥ ईड्यक्रत्नूरुमपैदेवीरुपब्रुवेदि
वानक्तंचसस्तुधीरपस्वरीः॥ प्रजापतयइदं॥ आज्यमसिसत्यमसिसत्यस्या
ध्यक्षमसिध्रुवरसिवैश्वानरवैश्वदेवमुत्तभुक्ष्॥ सत्यौजाः सक्रोसिसह
मानमसिसहस्वारातीः सहस्वारातीयतः सहस्वपृतनाः सहस्वपृतन्यतः
सहस्त्रवीर्यमसितन्मांजिन्वाज्यस्याज्यमसिसत्यस्यसत्यमसिसत्यायु

रसिसत्यशुष्मसिसत्येनत्वाभिषारयामितस्यत्तेभक्षीय॥ निर्मील्यानु
ष्वसंलक्ष्यतेध्वर्युर्यजमानश्च॥ अद्भिराज्यमाज्येनापःसम्यक्पुनीतसप्ति
तुःपवित्रैः॥ तादवीःशाकरीःशाक्करेणमंयुमवतसंविदानाः॥ आज्यम
पश्चोत्पूयमानाः॥ पंचानांत्वावातानांयंत्रायधर्त्रायगृण्हामि॥ पंचानांत्व
तूनांयंत्रायधर्त्रायगृण्हामि॥ पंचानांत्वादित्यायंत्रायधर्त्रायगृण्हामि॥
पंचानांत्वापंचजनानांयंत्रायधर्त्रायगृण्हामि॥ चरोस्त्वापंचबिलस्यय
त्रायधर्त्रायगृण्हामि॥ ब्रह्मणस्त्वातेजसेयंत्रायधर्त्रायगृण्हामि॥ क्षत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यतैजसेयंत्राय धर्त्रायगृण्हामि॥ विश्नोत्वायंत्राय धर्त्रायगृण्हामि॥ सु
वीर्यायत्वागृण्हामि॥सुप्रजास्त्वायत्वागृण्हामि॥रायस्पोषायत्वागृण्हामि॥
ब्रह्मवर्चसायत्वागृण्हामि॥भूरस्माक ँ हविर्देवानामाशिषोयजमानस्य
देवानांत्वादेवत्ता भ्योगृण्हामि॥ अग्निश्चेमबर्हिर
न्तःपृथिव्या ँ स ँ रोहयंत्वोषधीर्विवृक्णाः॥ यासांमूलमुदवधीस्फोनंशिवा
नस्ताःसुरवा भवंतु॥बर्हिरासाद्यमानं॥सुमनसोयजमानायसंत्वोष धीरा
पश्चराकरीश्च॥वृष्टिवावापर्जन्यएनाविरोहयतुहिरण्यवर्णाःशतवल्शा

अदब्धाः॥बर्हिरुद्यमाणं॥पितृभ्योबर्हिरुद्यतं॥अपउपस्पृशा॥ऊर्णाम्रदुप्र
थमान ँ स्योनंदेवेभ्योजुष्ट ँ सदनायबर्हिः॥सुवर्गेलोकेयजमान ँ हिधेहिमाम्नाक
स्यपृष्ठेपरमेव्योमन्॥बर्हिस्तीर्यमाणमनुमंत्रयते॥धातोधातोमंत्रः॥चत्तुःत्रि
वेजायुवतिःसुपेशाघृतप्रतीकाव्युनानिवस्ते॥सास्तीर्यमाणामहतेसौभगा
यसामेधुस्त्वयजमानायकामान्॥मध्यमधातुनावेदि ँ स्तीर्यमाणं॥द्यावाचमि
शग्माचैधिस्योनाचमेसुषदाचैध्यूर्जस्वतीचमेपयस्वतीचैधिसूपचरणाचमेस्वधि
चरणाचैधीषमूर्जमेपिन्वस्वब्रह्मतेजोमेपिन्वस्वक्षत्रमोजोमेपिन्वस्वविशंपुष्टिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेपिन्वस्वायुरस्मासुधेहिमेपिन्वस्वप्रजांपशून्मेपिन्वस्व ॥ स्तीर्यमाणा ॥ अस्मिन्यज्ञउप
भूयइन्द्रमेवक्षोभायपरिधीदधामि ॥ धर्नाधरुणोधरीयानग्निर्हव्यंसिमिरितानुदन्ता
ते ॥ ध्रुवोसिध्रुवोऽयंसजातेषु भूयासंधीरश्चेत्तावसुवित् ॥ मध्यम ॥ अस्मिन्यज्ञ
उग्रोस्युग्रोऽयंसजातेषु भूयासमुग्रश्चेत्तावसुवित् ॥ युनज्मित्वाब्रह्मणादैव्येन
व्यायास्मेवोढवेजातवेदः ॥ इंधनास्त्वासुप्रजसःसुवीराज्यागजीवेमबलिहृतो
वयंते ॥ यन्मेअग्नेअस्ययज्ञस्यरिष्याद्यद्वास्कंदाद्याज्यस्योत विष्णो ॥ तन्नऽन्मिसपत्नं
दुर्मरायुमेनंदधामिनिर्ऋत्याउपस्थे ॥ अग्निंपरिधीमीयं ॥ अस्मिन्यज्ञे ॥ अभिभूर

माणं ५७

स्यभिभूरुऽयंसजातेषुभूयासमभि भूश्चेत्तावसुवित् ॥ तेजिष्ठातेतपनायाश्चरोचना
प्रत्योषंतीस्तुन्वायास्तेअग्नेतामिर्वर्माण्यभितोमयस्तुमात्वाद्भन्यातुधानाःपिशा
चाःपरिधित ॥ विष्णोर्नुकंविधृतीभ्याऽयंसपत्नोजातान्भ्रातृव्यान्येचजनिष्यमाणाः ॥
विष्णोयंत्राभ्यांविधेमाभ्यनान्ऽयंस्वानामुत्तमोसानिदेवाः ॥ विष्णोयंत्रेनुदमाने
अरातिंविश्वंपाप्मानममतिंदुर्मरायु ॥ सीदंतीदेवीसुकृतस्यलोकेधृतीस्योवि
धृतीस्वधृतीप्राणान्मयिधारयंतंप्रजांमयिधारयंतंपशून्मयिधारयंतं ॥ वि
धृतीसाद्यमाने ॥ अयंप्रस्तरऽभयस्यधृत्यैधृत्यैप्रियाजानामुतानूयाजानां ॥

अग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदो धारसमिधोविश्वरूपास्तस्मिन्त्सुचोऽअध्यासादयामि॥ प्रस्तरं॥आरोहप
थोजुहूदेवयानान्यत्रर्षयःप्रथमजायेपुराणाः॥हिरण्यपक्षाजिरासंभृतांगाव
रासिमासुक्तायत्रलोकाः॥जुरसिघृतान्वीगायत्रियाम्नीकविभिर्जुषाणा॥
अव्यथमानायज्ञमनुयच्छस्वसुनीतीयज्ञंनयास्युपदेवान्याग्नेयेनदार्मणादै
व्येन॥जुहूं॥अवाड्बाधरुपभृतासपत्नीजातान्भ्रातृव्यान्येचजनिष्यमाणाः॥
दोहैयज्ञंसुदुघाइवधेनुरुत्तरोभूयासमधरेमत्सपत्नाः॥सुभृदस्युपभृद्घृता
चीत्रेषुभेनच्छंदसाविश्ववेदाः॥अव्यथमानायज्ञमनुयच्छस्वसुनीतीयज्ञंनयास्यु

पदेवान्दैव्येनदार्मणादैव्येन॥उपभृतं॥योमावाचामनसादुर्मरायुर्हृदारातीयाद्
भिदासदग्ने॥इदमस्यचित्तमधरंध्रुवायाऽउत्तरोभूयासमधरेमत्सपत्नाः॥
ध्रुवासिधरणीधनस्यपूर्णाजागतेनच्छंदसाविश्ववेदाः॥अव्यथमानायज्ञमनु
यच्छस्वसुनीतीयज्ञंनयास्युपदेवान्वैश्वदेवेनदार्मणादैव्येन॥ध्रुवं॥स्योनोमे
सीदसुषदःपृथिव्याप्रथस्वप्रजयापशुभिःसुवर्गेलोकेदिवसीदपृथिव्यामंत
रिक्षेऽउत्तरोभूयासमधरेमत्सपत्नाः॥अथस्तुवोऽभिजुहोतिहोमांश्च
तस्रश्चछंदसानुष्टुभेन॥सर्वायज्ञस्यसमनक्तुविष्णाबार्हस्पत्येनदार्मणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैव्येन॥ इय॰ स्थालीघृतस्य पूर्णाच्छिन्नपयाः स्रुत धारुत्सः॥ मारुत्तेनु
र्मणोदैव्येन॥ आज्यस्थाली॥ यस्तआत्मापशुषुप्रविष्टोदेवानांविशामनुयो
वित्तस्य॥ आत्मन्वान्सोमघृतवान्हभूत्वादेवान्गच्छसुवर्विद्यजमानायम
ह्यं॥ साम्नाय्येआसाद्यमाने॥ यज्ञोसिसर्वत्तःश्रित्तःसर्वतोमांभूतं भविष्यद्
यता॰ स्रुतंमेसंत्वाशिषःसत्यंमेसंतुसूनृताइरावतीःपशुमतीः॥ आ
ग्नेय्यमासन्नमभिमंत्रयते॥ प्रजापतिरग्निसर्वत्तःश्रित्तः॰ इरावतीःपशुमतीः॥
अग्नीषोमीयंयोनःकनीय॰ अपतमिंद्रोवैमृधोभुवनानुदतामरुप्रजावीरव

+ स्रुतंमयिश्रयतां॥ स्रुतायत्वृषि॰४ अपतमिंद्रोवैमृधोभुवनानुदतामरु॰

स्यां॰ तीविंदेयपौर्णमा॥ योनःकनीयइत्कामयातआस्मिन्यज्ञेयजमानायमत्वं॥
अपतमिंद्राग्नीभुवनानुदतामरुप्रजावीरवतीविंदेय॥ एंद्राग्नं॥ इदमिंद्रिय
ममृतंवीर्यमनेनेंद्रायपुरोवोचिकिरसन्॥ तेनदेवाअवृतोपुमामिदेषमूर्जेय
शःसहओजःसनेयं॰ वैमन्वरत्नमविंदंयेनासिंचद्बलमिंद्रप्रजापतिः॥ इदं
तच्छुक्रमधुवाजिनीवधेनोपरिप्लाद्धिनोन्मेहंद्रंदधिमांधिनोतु॥ दधि॥ अयय
जेःसमसद्भविष्मानृचासामायजुषादेवताभिः॥ तेनलोकान्त्सूर्यवतो
जयेमेंद्रस्यसख्यममृतत्वमश्याः॥ सं॰ सन्नान्यभिमृशति॥ मामाग्नेवर्चोसुवासु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीराः॥ मह्यंयजंतुमयानिरुक्ताकृतिःसत्यामनसोमेअस्तु॥ एनोमानिगां
कृतमच्चनाहंविश्वेदेवासोअधिवोचतामे॥ देवीःषडुर्वीरुरुणःकृणोतुविश्वेदे
वासइहवीरयध्वे॥ माहास्महित्रजनयामातनूभिर्मारधामद्विषतेसोमराजन्॥
अग्निर्मन्युंप्रतिनुदन्पुरस््ताद्दध्रोगोपाःपरिपाहिनस्त्वं॥ प्रत्यंचोयंतुनिगुतःपु
नस्तेमेषांचित्तंप्रबुधाविनेशत्॥ धानाधातृणांभुवनस्ययस्पतिर्दधृसावित्ता
रमभिमातिषाहं॥ इमंयज्ञमश्विनोभाबृहन््स्पतिर्देवाःपातुयजमानंन्युर्था
न्॥ उरुव्यचानोमहिषःशर्मयछसदस्मिन््वपुरुहूतःपुरुक्षु॥ मनःप्रजायै ॥१०॥

हर्यश्वमृडयेंद्रमानोरीरिषोमापराद्राः॥ पृथिवीहोता॥ घोरध्वर्युः॥ द्रोग्नीत्॥
बृहस्पतिरुपवक्ता॥ पौर्णमास्याऽहुवीऽव्यासन्नान्यभिमृशंति॥ अग्निहो
त्ता॥ अश्विनाध्वर्यु॥ त्वष्टाग्नीत्॥ मित्रउपवक्ता॥ पंचहोत्रैवामावास्यायां॥
दशहोतारंपुरस्तात्सामिधेनीनांव्याचक्षीत॥ अंगिरसोमास्ययज्ञस्यशांत
नुवाकैरवंतु॥ अनूच्यमानासुसामिधेनीषुजपति॥ समिद्धोअग्निराहुतः॥
स्वाहाकृतःपिपर्त्तुनः॥ स्वगादेवेभ्यऽइदंनमः॥ शुक्रोअग्नेयजमानायैधिनि
शुक्रोअभिदासते॥ अग्नेदेवेद्धमन्विद्धमेद्र जिह्वामर्त्यस्यतेहोतर्मूर्धनाजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मिरायस्योषायसुप्रजास्त्वायसुवीर्याय॥ समिद्धमाग्निं॥ देवाःपितरःपितरोदे
वायोरुमस्मिसमन्यजेयस्याग्निनतमंतरेमिस्वंमइष्ट ०स्वंदत्त ०स्वपूर्त ०
स्व ०श्रांत ०स्व ०हुतंतस्यमेग्निरुपद्रष्टोषायुरुपश्रोतादित्योनुख्याताद्यौः
पितापृथिवीमातात्रजापतिर्बंधुर्यएवास्मिसमन्यजेयस्यास्मिनतमंतरे
मि॥ सोतुन्नवरेजपति॥ प्रजापतयेमनवेदं॥ मनोसिप्राजापत्यंमनसामा
भूत्तेनाविश॥ स्रुवाघारमनु घारयति॥ इंद्रायेदं॥ वागस्येंद्रीसपत्नक्षयणी
वान्वामेंद्रियेणाविश॥ स्रुच्याघारं॥ देवाःपितरःपितरोनरेमिमादेवेभ्या॥ १७

श्रावयासुवेवर्चसे॥ अध्वर्युःप्रवरे॥ चतुर्होतारंपुरस्तात्प्रयाजानांव्याचक्षी
न॥ अग्नयेरुद्रं॥ वसंतमृतूनांप्रीणामिसमाप्रीतःप्रीणातु॥ अग्नयेरुद्रं॥ ग्री
ष्ममृतूनांप्रीणामिसमाप्रीतःप्रीणातु॥ अग्नयेरुद्रं॥ वर्षाऋतूनांप्रीणामिता
माप्रीताःप्रीणंतु॥ अग्नयेरुद्रं॥ शरदृतूनांप्रीणामिसामाप्रीतांप्रीणातु॥
अग्नयेरुद्रं॥ हेमंतशिशिरावृतूनांप्रीणामितौमाप्रीतौप्रीणीतां॥ अग्नय
रुद्रं॥ अग्निश्चक्षुषा ०स्तस्याहंदेवयज्ययाचक्षुष्मान्भूयासं॥ सोमायेदं॥
सोमश्चक्षुषा ०स्तस्याहंदेवयज्ययाचक्षुष्मान्भूयासं॥ पंचहोतारंपुरस्ता

हेमंतशिशिरा ऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽषिषामवदानानां व्याचक्षीत ॥ अग्नयऽइदं ॥ अग्नेरऽइदं देवयज्ययान्नादो भूया
सं ॥ प्रजापतयऽइदं ॥ दब्भिरस्यदब्धो भूयासं पाप्मानं मे भया
मिदं ॥ अग्नीषोमाभ्यां ॥ अग्नीषोमयोरऽइदं देवयज्ययाक्षत्रस्य भूयासं ॥ इंद्रायवैमृधायेदं ॥ इंद्र
स्यैवैमृधस्याऽइदं देवयज्ययासपत्नो भूयासं ॥ इन्द्रियौपशोमास्यो ॥ अथदर्शो ॥
इंद्राग्निभ्यामिदं ॥ इंद्राग्नियोरऽइदं देवयज्ययेंद्रियावी वीर्यवान्भूयासं ॥ इंद्रा
येदं ॥ इंद्रस्याऽइदं देवयज्ययेंद्रियावी भूयासं ॥ महेंद्रस्याऽइदं देवयज्ययाजेमा
नंमहिमानंगमेयं ॥ इत्यमावास्यायां ॥ अग्नयेस्विष्टकृतऽइदं ॥ अग्नेः स्वि

१२

सामेंसत्वा शीरस्यज्ञस्यभूयादरेडतामनसा तच्छकेयज्ञो दिवंरोहतुयज्ञोदिवंगच्छतुयोदेव्या नुः प
थास्तेनयज्ञोदेवाऽअभ्येतस्मात्त्विद्रेंद्रियंदधातस्मान्नायउतयज्ञाः संवंतामंसुस्मं सान्त्वाशिषः सा
स्मो

ष्टकृतोऽइदं देवयज्ययायुष्मान्यज्ञनप्रतिष्ठांगमेयं ॥ अग्निर्मादुरिष्टाँपातु ।
सवितात्वश्वःसाघोमोंनिदरेरातीयंतंतमेतेनजेषं ॥ पित्रेपितामहायत्र
पितामहायेदं ॥ अपउपस्पृश्य ॥ सुरूपवर्षवर्णएडीमान्भद्रंदुर्यऽअभ्येहि
मामनुव्रतान्युशीर्षाणिमृदमिऽएह्यदितएहिसरस्वत्यैहिंतिरंतिरसिरमंतिर
सिसूनर्यसिजुष्टंजुष्टिंतेशीयोपरुतुपरुवंतेशीय ॥ ऊर्जामाद्रियमाणांप्रतीं
क्षंते ॥ इडाएह्यदितएहिभूयस्येहिश्रेयस्येहिवसीयस्येहिचित्तएहिधिष
णेहि ॥ उपाऽऊपरुवेसत्पदेवगवीर्जपतिं ॥ चिदसिमनासिदक्षिणंतीरमंतिः

नः प्रियासुप्रतूर्तिर्मघोनी जुष्टिरसिजुषस्वनोजुष्टानोसिजुष्टिंतेगमेयं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूनरीसूनृता॥उच्चैरुपहवेससमनुष्यगर्वाजपति॥विश्वात्वं भूतानुत्राणि
हिविश्वात्वा भूतानुत्राणंतु॥भूरस्यायुरसीष्टिरसि। सुरूपवर्षवर्णएडौमा
न्भद्रादुर्या७भ्येहिमामनुव्रतान्युशीर्वाणिमृदु७ सान:प्रियासुप्रतूर्तिःप्रि
यान:सुहृन:प्रियवतीमधोनीजुष्टएडिरंनएडिरमनुएडिसूनृतएडिसुरूपा
मएडिसदृरायस्पोषेणदेवीर्देवभिमानिवर्तध्व७स्योनास्योनेनघृतेनमा
समुक्षतनमएनदुपहूतंभिषग्भ्यांब्रह्मायद्दौसमुद्रादुदचानिवसुचावागंयवि
ग्रस्यातिष्टतिश्रृंगेभिर्दृशाभिर्दिवान्॥उच्चैरुपहवे॥वायविउतेमाता॥ज्ञेतार

मीक्षमाणोवायुमनसाध्यायेत्॥उपहूतोयंयजमानइत्युच्यमाने॥उपहूतःपशु
मानसानि॥जपति॥अस्मास्विंद्रंइंद्रियंदधात्वस्मान्रायउतयुक्षाःसचंतामस्मा
सुसंत्वाशिषःसान:प्रियासुप्रतूर्तिर्मघोनीजुष्टिरसिजुषस्वनोजुषाणोसिजु
ष्टिंतेगमेयं॥इडायाअग्ंदेवयज्यापुष्टिमान्पशुमान्भूयासमिडे भागंजुषस्व
नोजिन्वगाजिन्वार्वतस्तस्यास्तेभक्षिषीमहिस्यामसर्वात्मान:सर्वगणाः॥इडा
धेनुःसदृवत्सानआगाद्दुहांदुहानापयसाप्रपीना॥सानोभद्रेनहविषोनगोभि
रिडाजिन्वतांपयसाध्यस्मान्॥उपहूतामिडा॥मनोज्योतिर्जुषतामाज्यंविच्छिन्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञ॰ सम्मिमंद्धातु॥ बृहस्पतिस्तनुतामिमंनो विश्वेदेवाइहमादयंतां॥ ब्रध्नापि
न्वस्त्वद्दतोमेमाक्षाग्नेकृत्तोमेमोपदस्दिशांकृसिरासिदिशोमेकल्पंतांकल्पं
तांमेदिशोदैवीश्चमानुषीश्चाहोरात्रेमेकल्पतामर्धमासामेकल्पंतांमासामेक
ल्पंतामृतवोमेकल्पंता॰ संवत्सरोमेकल्पतांकृसिरासिकल्पतांमआशानांत्वा
शापाल्पेभ्यश्चतुर्भ्योऽमुत्रेभ्यइदंभूतस्याध्यक्षेभ्योविधेमहविषावयं। भजतां
भागीभागंमाभागोभक्तनिर भागंभजामोपस्यिन्वोषधीर्जिन्वहिपात्याहुच
तुष्पादवदिवोवृष्टिमेरय॥ ब्राह्मणानामिद॰ हविःसोम्यानाम॰ सोमपीॅतांनि १४

थि॰

स्यजैस्वाम्पयस्वान्प्राणापानोमेपाहि समानव्यानोमेपाह्युदान
व्यानोपाह्यक्षितास्यक्षियेत्वामामेक्षेष्ठा ४

मै
भक्तोब्राह्मणोनेहाब्राह्मणस्यास्ति॥ प्रतिदिशांमूहति॥ इदंब्रह्मणः। इद॰ क्षे
त्रः। इदमध्वर्योः। इदमग्नीध्रः॥ चतुर्धाम्नादिशाति॥ इय॰ स्थाल्यूर्ध्वस्यपूर्णा
सलक्षधारउत्सोऽक्षीयमाणः॥ सदाधारपृथिवीमंतारिक्षंदिवंचतेनोदनेनाति
तराणिमृत्यु॥ प्रजापतेर्भागोऽमुत्रामुष्मिंलोके॥ अंतर्वेद्यन्वाहार्यमासन्नम
भिमृशति॥ दक्षिणतएतब्राह्मणाः॥ अयंवओदनोयथाभागंप्रतिगृण्हध्वं॥
संप्रेष्यति॥ दक्षिणांप्रतिग्रहीष्यन्त्सत्पदशन्नत्वोपान्यात्॥ व्याहृत्यप्रतिगृ
ह्णं॥ देवस्यत्वा॰ प्रतिगृह्णामिराजात्वावरुणेनयतुदेवीदक्षिणेब्रह्मणओदने॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनामृतत्वमश्यांवयोदात्रेभूयान्मयोमत्वमस्कृधिग्नइत्येकइदंकस्माअस्मै
कामःकामायकामोदातेकामःप्रतिग्रहीतेकामःसमुद्रमाविशकामेन
त्वाप्रतिगृह्णामिकामैतत्तेएषातेकामदक्षिणोत्तानस्त्वांगोरमःप्रतिगृह्णा
तु॥अन्वार्यंचतुर्थकरणक्रमेणप्रतिगृह्यप्रत्यायंति॥ब्रह्मापिस्वमार्गेण
गत्वाप्रतिगृह्यागत्योपविशेत्॥अग्नयइदं॥एषातेअग्नेसमित्तयावर्द्धस्वचाच
प्यायस्व॥बर्हिषीमहित्वयमाचप्यासिषीमहि॥यंत्वेअग्नआदधुश्चाम्यइंवासि
पित्तश्चरन्॥प्रजांचतत्सर्वमूलंचनीचैर्दैवानींवृश्चत॥अग्नेयोनोभिदासत्तिस

मानोयश्चनिष्ट्यः॥इध्मस्येवप्रक्षायन्नोमात्तस्योद्वेषिकिंचन॥योमांहेष्टिजा
तवेदोयंचाहंद्वेष्मियश्चमां॥सर्वांस्तानग्नेसंदह्यार्वाचंहेष्मियंचमां॥अ
नूपाजसमिधमाधीयमानो॥भूतानामधिपतयेरुद्रायनंतिचरायेद॥वेदि
बर्हिस्तृत्वाहविरिध्मःपरिधयःस्रुचः॥आज्यंयज्ञक्रतोयजुर्याज्याश्चव
षट्कारःसंमेसन्नत्तयोनमंताग्निध्मंसंनहनंतुते॥इध्मसन्नहनंतुतेजपति॥
अंगिरसोमास्ययज्ञस्यप्रातरनुवाकैरहोषुः॥अनूपाज्नेषुजपति॥मतद्
विर्हेतां॥सत्यहविरध्वर्युः॥अच्युत्तपाजाअग्नीत्॥अच्युत्तमनाउपवक्ता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अना धृष्यश्वाप्रति धृष्यश्वयज्ञस्या भिगरो॥ भयास्यउद्गात्ता॥ सत्सहोता
रंपुरस्तादनूयाजानांव्याचक्षीत॥ अग्नयइदं॥ बर्हिषोदेवयज्ययाप्र
जावान्भूयासं॥ अग्नयइदं॥ नराश्ऽसस्यादेवयज्ययापशुमान्भूयासं॥
अग्नयइदं॥ अग्नेस्विष्टकृतोदेवयज्ययायुष्मान्यज्ञेनभूयासंगमेयं॥ स्विष्टकृत्-
वसुभ्यइदं॥ वसूंदेवान्यज्ञेनाप्रीणयं॥ रुद्रेभ्यइदं॥ रुद्रान्देवान्यज्ञेनाप्रीणा
यं॥ आदित्येभ्यइदं॥ आदित्यान्देवान्यज्ञेनाप्रीणयं॥ परिधीनज्यमाना
न्॥ समक्तांबर्हिरुविषाघृतेनसमादित्यैर्वसुभिःसंमरुद्भिः॥ सामिंद्रेणावि १६
वाजंस्पाम्यूर्जस्वतोमयोभूयासं॥ अथोसुप्तानं॰ इंद्रौमेनिद्राभेषाधरा॰ अकः॥
उद्भ्रंचोनिद्राभंचो॥ अत्रैवयमवीवृधन्॥ अथोसुप्तोनिद्राग्नेविषूचीनाव्यस्यता॥


ग्नेभिर्देवेभिरंक्तांदिव्येनभोगछतुयत्स्वाहा॥ प्रस्तरमज्यमानमनुमंत्रयते॥
अपिनेज्यज्ञोयज्ञमयाट्देवाश्ऽअरंकृतःसोमः॥ तंमित्रोवरुणोअर्यमाग्नि
यस्योषायजमानंविशंतु॥ प्रस्तरस्यतृणमपात्तअनुमंत्रयते॥ अग्नयइदं॥
अग्नेरुमुज्जितिमनूज्जेषं॥ सोमायेदं॥ सोमस्यारुमुज्जितिमनूज्जेषं॥ अ
ग्नयइदं॥ अग्नेरुमु॰षं॥ प्रजापतयइदं॥ प्रजापतेरुमु॰षं॥ अग्नीषोमा
भ्यांइदं॥ अग्नीषोमयोरु॰ज्जेषं॥ इंद्रायवेमृधायेदं॥ इंद्रस्यवेमृधस्यारुमु
ज्जितिमनूज्जेषं॥ इंद्राग्निभ्यामिदं॥ इंद्राग्नियोरुमुज्जितिमनूज्जेषं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामेसत्यावीर्देवेषु भूयाद्ब्रह्मवर्चसमागम्यात्॥

देवेभ्य आज्यपेभ्यस्वाहा॥ देवानामाज्यपानामनुमृज्जितिमनूज्जेषं॥ अग्नये
स्विष्टकृतस्वाहा॥ अग्नास्विष्टकृतोऽनुमृज्जितिमनूज्जेषं॥ यदि दीक्षायज
मानस्यनामगृह्णीयात्तर्हिब्रूयात्॥ एमाअग्मन्भाविषोदोहकामाद्रुवं
तोवनामदेधुस्सीमहिप्रजामिषं॥ सामेसत्यावीर्देवेषु भूयात्॥ सत्यान्मन्य
तमाऽजुष्टाज्जुष्टतमादेवत्तामनसान्छकेयंस्वाहादेवश्रोरनुवयस्वाहादि
वंगच्छतुयोदेवयानःपंथास्तेनयस्वाहादेवाश्चअप्येतु॥ आशिःघृतपाति॥ य
स्तोमंअगन्म्यात्॥ यत्कामयतेतस्यनामगृह्णाति॥ रोहितेनत्वाग्निर्देवता १७

[OrderDescription]
,CREATED=24.07.19 15:39
,TRANSFERRED=2019/07/24 at 15:46:37
,PAGES=19
,TYPE=STD
,NAME=S0001114
,Book Name=M-2016-DASHPURAN MASYAG MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection